# सन्देशः



**राष्ट्रपतिप्रशस्तिपुरस्कृतः**
**विद्वान् शेषाचलशर्मा**
**गिरिनगरम्, बेङ्गलूरु**

आशास्ते, कर्णाटकदेशे बहोः कालात्पूर्वं संस्कृतविश्वविद्यालयस्य अवश्यकर्तव्यता आसीदिति । मल्लेपुरं प्रो. वेङ्कटेशमहाभागस्य उपकुलपतित्वे अयं संस्कृतविश्वविद्यालयः स्थापितो भवतीति महान् प्रमोदः सञ्जायते । स च महोदयः सर्वसमर्थः । संस्कृतशास्त्राणां सर्वविधा अभिवृद्धिः भूयादिति आशंसा क्रियते । संस्कृतभाषायाः प्रचारः विदेशेषु महता प्राबल्येन भवतीति महान् सन्तोषः । मल्लेपुरं वेङ्कटेशमहाशयस्य कुलपतित्वे संस्कृतभाषायाः संस्कृतशास्त्राणां च पुरोऽभिवृद्धिः भवेदिति पुनरपि आशंसा क्रियते । आधुनिक-प्रचारसामग्रीद्वारा संस्कृतभाषायाः संस्कृतशास्त्राणां च विशेषतः अध्ययनं भवेदिति आशंसनं क्रियते । श्रीमत्या नागरत्नायाः सम्पादकत्वे वार्तापत्रमिदं प्रगतिं साधयतु ।

**विद्वान् शेषाचलशमा**